पुरूरवाश्चार्द्रवाश्च विश्वेदेवौ च पर्व्वणि ।”
इति वह्निपुराणे गणभेदनामाध्यायः ॥
( विश्वस्य देवतास्वरूपे, त्रि । यथा, हरिवंशे ।
१८६ । १६ ।
“श्रुतं मे विश्वदेवानां यद्रहस्यं महर्षिणाम् ।
तदिदं सर्व्वदेवानां तत्त्वतस्तत्त्ववादिनाम् ।”)
विश्वदेवा, स्त्री, हस्वगवेधुका । गोरक्षाकुलिया इति भाषा । इति जटाधरः ॥ नागबला । अरुणपुष्परक्तोत्पलः ; इति रत्नमाला ॥
विश्वद्र्यङ्, [ च् ] त्रि, सर्व्वत्रगमनकर्त्ता । विश्वक् समन्तात् अञ्चति गच्छति विष्वद्र्यङ् सर्व्वतोगामी मूर्द्धन्यमध्यः तालव्यमध्योऽप्यौणादिकेऽ । इत्यमरभरतौ ॥
विश्वधारिणी, स्त्री, ( विश्वं सर्व्वं धरतीति । धृ + णिनिः । ङीप् । ) पृथिवी । इति केचित् ॥
विश्वनाथः, पुं, ( विश्वस्य नाथः । ) शिवः । इति शब्दरत्नावली ॥ ( यथा, वैराग्यशतके ।१०२।
“न गृहीतं श्रुतिहृदयं
न च न गृहीतं परिशिवं हृदयम् ।
इच्छामि च धाम परं
गच्छामि तु विश्वनाथपुरीम् ॥”
साहित्यदर्पणप्रणेता पण्डितविशेषः । यथा, साहित्यदर्पणे ।
“श्रीचन्द्रशेखरमहाकविचन्द्रसूनु-
श्रीविश्वनाथकविराजकृतं प्रबन्धम् ।
साहित्यदर्पणमसुं सुधियो विलोक्य
साहित्यतत्त्वमखिलं सुखमेव वित्त ॥”
विद्यानिवासभट्टाचार्य्यपुत्रः पञ्चाननोपाधिकः भाषापरिच्छेदसिद्धान्तमुक्तावलीप्रणेतापरपण्डितविशेषः ॥ )
विश्वपर्णी, स्त्री, भूम्यामलकी । इति राजनिर्घण्टः ॥
विश्वपाः, पुं, ( विश्वं पातीति । पा + विच् । ) विश्वपालनकर्त्ता । स तु परमेश्वरः । इति मुग्धबोधव्याकरणम् । ( यथा, हरिवंशे । २५१ अध्याये ।
“विश्वस्य पते ष्टताधसि अनन्तकर्म्मन् हुतवहवंशप्राग्र्यंश विश्वपालम् ।”)
विश्वप्सा, [ न् ] पुं, (विश्वं प्सातीति । प्सा + भक्षणे + “श्वन्नुक्षन्पूषन्प्लीहन्निति ।” उणा० १ । १५८ । इति कनिन्प्रत्ययेन साधुः । ) अग्निः । चन्द्रः । इति हेमचन्द्रः ॥ देवः । विश्वकर्म्मा । इति संक्षिप्तसारोणादिवृत्तिः ॥ सूर्य्यः । इति शब्दरत्नावली ॥
विश्वबोधः, पुं, ( विश्वस्य बोधो यस्य । ) बुद्धः । इति त्रिकाण्डशेषः ॥
विश्वभूः, पुं, बुद्धभेदः । इति हेमचन्द्रः ॥
विश्वभेषजं, क्ली, ( विश्वेषां भेषजम् । ) शुण्ठी । इत्यमरः ॥ ( यथा, सुश्रुते । १ । ४४ ।
“विश्वभेषजमृद्वीकाचित्रकैर्म्मभावितैः ॥”
तथास्य गुणाः ।
“स्नेहदीपनं हृद्यमुष्णं वातकफापहम् ।
विपाके मधुरं हृद्यं रोचनं विश्वभेषजम् ॥”
इति चरके सूत्रस्थाने २७ अध्यायः ॥)
विश्वभोजाः, [ स् ] पुं, सर्व्वभुक् । विश्वशब्दपूर्व्वकभुजधातोः औणादिकासिप्रत्ययेन निष्पन्नमिदम् ॥ ( विश्वरक्षके, त्रि । यथा, ऋग्वेदे ।५।४१।४।
“पूषाभागः प्रभृथे विश्वभोजाः ।”
“विश्वभोजा विश्वरक्षकाः ।” इति तद्भाष्ये सायणः ॥ )
विश्वमदा, स्त्री, अग्निजिह्वा । यथा,—
“काली कराली च मनोजवा च
सुलोहिता चैव च धूम्रवर्णा ।
स्फुलिङ्गिनी विश्वमदार्चिसोऽग्नेः
सप्तैव जिह्वाः कथिता मुनीन्द्रैः ॥”
इति शब्दमाला ॥
विश्वम्भरः, पुं, ( विश्वं विभर्त्तीति । भृ + “संज्ञायां भृतॄवृजीति ।” ३।२।४६ । इति खच् । “अरुर्द्विषदिति ।” ६।३।६७ । इति मुम् । ) विष्णुः । ( यथाह कश्चित् ।
“विश्वम्भर ! भरास्माकं विश्वस्माद्वा बहिःकुरु ।
अथ पक्षद्वयाभावे त्यज विश्वम्भरत्वकम् ।”)
इन्द्रः । इति मेदिनी । रे, २६५ ॥
विश्वम्भरा, स्त्री, ( विश्वं विभर्त्तीति । भृ + खच् । मुम् । टाप् । ) पृथिवी । इत्यमरः ॥ अस्या व्युत्पत्तिर्यथा,—
“विश्वम्भरा तद्धरणाच्चानन्तानन्तरूपतः ।
पृथिवी पृथुकन्यात्वाद्विस्तृतत्वाच्च हा मुने ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ७ अध्यायः ॥
( यथा, उत्तरचरिते । १ अङ्के ।
“विश्वम्भरा भगवती भवतीमसूत
राजा प्रजापतिसमो जनकः पिता ते ॥”)
विश्वयुः, पुं, वायुः । इति केचित् ॥
विश्वरूपः, पुं, ( विश्वमेव रूपं यस्य । ) विष्णुः । इति हेमचन्द्रः ॥ ( महादेवः । यथा, महाभारते । ७ । २०० । १२४ ।
“विश्वे देवाश्च यत्तस्मिन् विश्वरूपस्ततः
स्मृतः ॥”
त्वष्टृपुत्रः । यथा, विष्णुपुराणे । १ ।१५।१२२ ।
“त्वष्टुश्चाप्यात्मजः पुत्रो विश्वरूपो महायशाः ॥”
सर्व्वरूपे, त्रि । यथा, भागवते । ६ । ४ । २८ ।
“स सर्व्वनामा स च विश्वरूपः
प्रसीदतामनिरुक्तात्मशक्तिः ॥”)
विश्वरूपकं, क्ली, कृष्णागुरु । इति राजनिर्घण्टः ॥
विश्वरेताः, [ स् ] पुं, ( विश्वे रेतः शक्तिर्यस्य । ) ब्रह्मा । इति हेमचन्द्रः ॥
विश्वरोचनः, पुं, ( विश्वान् रोचयतीति । रुच् + ल्युः । ) नाडीचशाकः । यथा,—
“केमुकं पेमुली पेमुर्नाडीचो विश्वरोचनः ॥”
इति त्रिकाण्डशेषः ॥
विश्ववेदाः, [ स् ] त्रि, सर्व्वज्ञः । विश्वं वेत्ति इत्यर्थे विश्वशब्दपूर्व्वविदधातोरसुप्रत्ययेन निष्पन्नमिदम् । यथा,—
“स्वस्ति न इन्द्रो वृद्धश्रवाः
स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्योऽरिष्टनेमिः
स्वस्ति नो बृहस्पतिर्दधातु ॥”
इति यजुर्व्वेदिस्वस्तिवाचनमन्त्रः ॥
( यथाच भागवते । ८ । ३ । २६ ।
“सोऽहं विश्वसृजं विश्वमविश्वं विश्ववेदसम् ।
विश्वात्मानमजं ब्रह्म प्रणतोऽस्मि परं पदम् ॥”)
विश्वसहा, स्त्री, अग्निजिह्वाविशेषः । यथा,—
“हेतिः शिखा च सप्ताग्नेर्जिह्वास्ता एव
कीर्त्तिताः ।
काली कराली सुहिता धूम्रवर्णा मनोजवा ।
स्फुलिङ्गिनी विश्वसहा संज्ञास्तासामुदाहृताः ॥”
इति जटाधरः ॥
विश्वसारं, क्ली, (विश्वेषां सारम् ।) तन्त्रविशेषः । इति प्रसिद्धम् ॥
विश्वसारकं, क्ली, ( विश्वसार + संज्ञायां कन् । ) विदरट्वचः । इति शब्दचन्द्रिका ॥ फणिमनसा । इति भाषा ॥
विश्वसितः, त्रि, ( वि + श्वस + क्तः । ) विश्वस्तः । इति मुग्धबोधव्याकरणम् ॥ (यथा, नैषधे ।१।१३१।
“न केवलं प्राणिवधो वधो मम
त्वदीक्षणाद्विश्वसितान्तरात्मनः ॥”)
विश्वसृक्, [ ज् ] पुं, ( विश्वं सृजतीति । सृज् + क्विप् । ) ब्रह्मा । इत्यमरः ॥ (विश्वस्रष्टरि, त्रि । यथा, रघुः । १० । १६ ।
“नमो विश्वसृजे पूर्व्वं विश्वं तदनु बिभ्रते ।
अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधा स्थितात्मने ॥”)
विश्वस्तः, त्रि, (वि + श्वस + क्तः ।) जातविश्वासः । इति मेदिनी । ते, १५५ ॥ यथा,—
“न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् ।
विश्वासाद्भयमुत्पन्नं मूलादपि निकृन्तति ॥”
इति गारुडे ११४ अध्यायः ॥
विश्वस्ता, स्त्री, विधवा । इत्यमरः ॥ (यथा, साहित्यदर्पणे । १० परिच्छेदे ।
“स्तनयुगमुक्ताभरणाः
कण्टककलिताङ्गयष्टयो देव ।
त्वयि कुपितेऽपि विश्वस्ताः
प्रागेव रिपुस्त्रियो जाताः ॥”)
विश्वस्था, स्त्री, ( विश्वतः सर्व्वतः तिष्ठतीति । विश्व + स्था + कः । ) शतावरी । इति राजनिर्घण्टः ॥
विश्वा, स्त्री, (विश + कन् । स्त्रियां टाप् ।) अतिविषा । इत्यमरः ॥ शतावरी । इति राजनिर्घण्टः ॥ पिप्पली । इति शब्दचन्द्रिका ॥ ( दक्षकन्याविशेषः । यथा, महाभारते । १ । ६५ । १२ ।
“क्रोधा प्राधा च विश्वा च वनिता कपिला-
मुनिः ॥”)
विश्वाची, स्त्री, अप्सरोविशेषः । यथा,—
“उर्व्वशी मेनका रम्भा मिश्रकेशी ह्यलम्बुषा ।
विश्वाची च घृताची च पञ्चचूडा तिलोत्तमा ॥